॥अथज्योतिषसूत्रारंभः॥

श्रीगणेशायनमः ॥ ॐ ॥ पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं ॥ दिनर्त्वयनमा
साङ्गंप्रणम्यशिरसाशुचिः ॥ १ ॥ प्रणम्यशिरसाकालमभिवाद्यसरस्वतीं ॥ का
लज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः ॥ २ ॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्य
नुपूर्वशः ॥ विप्राणांसंमतंलोकेयज्ञकालार्थसिद्धये ॥ ३ ॥ निरेकंद्वादशार्धा
ब्दंद्विगुणंगतसंज्ञिकं ॥ षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते ॥ ४ ॥ स्वरा
क्रमेतेसोमार्कौयदासाकंसवासवौ ॥ स्यात्तदादियुगंमाघस्तपःशुक्लोदिनं
त्यजः ॥ ५ ॥ प्रपद्येतेश्रविष्ठादौसूर्याचन्द्रमसावुदक् ॥ सार्पार्धेदक्षिणार्कस्तु
माघश्रावणयोःसदा ॥ ६ ॥ घर्मवृद्धिरपांप्रस्थःक्षपाह्रासउदग्गतौ ॥ दक्षि
णेतौविपर्यस्तौषण्मुहूर्त्ययनेनतु ॥ ७ ॥ द्विगुणंसप्तमंचाहुरयनाद्यंत्रयोद
श ॥ चतुर्थंदशमंचैवद्वियुग्माद्यंबहुलेऽप्यृतौ ॥ ८ ॥ वसुस्त्वष्टाभगोऽजश्चमि
त्रःसर्पाश्विनौजलं ॥ धाताकश्चायनाद्याःस्युरर्धपंचमभस्त्वृतुः ॥ ९ ॥ भांशाः

३ स्वुराष्टकाः कार्याः पक्षाद्द्वादशकोद्धृताः ॥ एकादशगुणस्योनः शुक्लेर्धं चैत्वं
यदि २ कार्या भांशाष्टकास्थाने कला एकान्नविंशतिः ॥ ऊनस्थाने द्विसप्त
तीरुद्वपेदूनसंमिताः ११ त्र्यहं शीभद्रांशो दिवसांशभागश्चतुर्दशस्याप्यु
पनीतभिन्नं ॥ भार्धेधिके चाधिगते परेंशे द्वावुत्तमेकेनवके च वेद्यं १२ पक्षा
त्पंचदशाच्चोर्ध्वं तद्भुक्तमिति निर्दिशेत् ॥ नवभिस्तूद्धृतांशस्याद्दूनांशाप्योधि
केन्तु १३ जौद्राघः खेश्वेहीरोषा चिन्मूषण्यः सोमाधानः ॥ रेमृघस्वा
पोजस्कृष्योहर्ज्येष्ठा इत्यृक्षा लिंगैः १४ जावाद्यंशैः समं विद्यात्पूर्वा
र्धे पर्वसूत्तरे ॥ भादानाशाश्चतुर्दशीकाष्ठानां द्विविना कलाः ३ कलादश हेत्व
चविंशास्याद्मुहूर्तस्य नाडिके ॥ द्युत्रिंशत्तत्कलानां तु षट्शतीत्र्यधिकं १
भवेत् १६ नाडिके द्वे मुहूर्तस्तु पंचाशत्पलमाषकं ॥ माषकात्कुंभको द्रो



णः कुटपैर्वर्धते त्रिभिः ॥ १७ ॥ ससस्तकुंभदुक्स्यानः सूर्याद्योनित्रयोदश ॥
नवमानि च पंचाह्नः काष्ठाः पंचाक्षरास्मृताः ॥ १८ शविष्ठाभ्यां गुणाभ्यस्ता
न्प्राग्विलग्नान्विनिर्दिशेत् ॥ सूर्यान्मासान्षडभ्यस्तान्विद्याचांद्रमसानृ
तून् ॥ १९ ॥ अतीतपर्वभागेषु शोधयेद्द्विगुणांतिथिं ॥ तेषु मंडलभागेषु तिथि
निष्ठां गतो रविः ॥ ४ ॥ याः पर्वभादानकलास्तासु सप्तगुणांतिथिं ॥ प्रक्षिप
त्कलासमूहस्तु विद्याद्दानकीः कलाः ॥ २१ ॥ यदुत्तरस्यायनतोयनं स्याच्छे
षं तु यद्दक्षिणतोयनस्य ॥ तदेव षष्ट्याद्विगुणं हि भक्तं सद्वादशं स्याद्दिवसप्र
माणं ॥ २२ ॥ तदर्धं दिनभागानां सदापर्वणि पर्वणि ॥ ऋतुशेषं तु तद्विद्यात्सं
ख्यायसहपर्वणां ॥ २३ ॥ इत्युपायसमुद्देशो भूयोप्यन्नं प्रकल्पयेत् ॥ ज्ञे
यराशिं गताभ्यस्ता न्विभजेज्ज्ञानराशिषु ॥ २४ ॥ अग्निः प्रजापतिः सोमा

ज्योति॰ २

रुद्रोदितिर्बृहस्पतिः॥ सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच २५॥ सवि
तात्वष्टाथवायुश्चेंद्राग्नी मित्रएवच॥ इंद्रोनिर्ऋतिरापोवैविश्वेदेवास्तथैव
च॥२६॥ विष्णुर्वसवोवरुणाजएकपात्तथैवच॥ अहिर्बुध्न्यस्तथापूषा
श्विनौयमएवच २७ नक्षत्रदेवताएताएताभिर्यज्ञकर्मणि॥ यजमान
स्यशास्त्रज्ञैर्नामनक्षत्रजंस्मृतं २८ इत्येतन्मासवर्षाणांमुहूर्तोदयप
र्वणां॥ दिनर्त्वयनमासांगंव्याख्यातंलगधोब्रवीत् २९ सोमसूर्यस्त्रि
चरितोलोकालोकेचसंमतं॥ सोमसूर्यस्त्रिचरितोविद्वान्वेदविदश्नुते ३० राम
॥६॥ विषुवंतद्गुणंद्वाभ्यांरूपहीनंतुषड्गुणं॥ यल्लब्धंतानिपर्वाणितथार्धं २
सातिथिर्भवेत् ३१ माघशुक्लप्रपन्नस्तुपौषकृष्णसमापिनः॥ युगस्य

५

ज्योति॰ ३

पंचवर्षस्यकालज्ञानंप्रचक्षते॥३२॥ तृतीयांनवमींचैवपौर्णमासींत्रयोद
शीं॥ षष्ठींचविषुवान्प्रोक्तोद्वादश्यांचसमंभवेत्॥३३॥ चतुर्दशीमुपवसथ
स्तथाभवेद्यथोदितोदिनमुपैतिचंद्रमाः॥ माघशुक्लाह्निकोयुंक्तेश्रविष्ठा
यांचवार्षिकीं॥३४॥ यथाशिखामयूराणांनागानांमणयोयथा॥ तद्वद्वेदां
गशास्त्राणांज्योतिषंमूर्धनिस्थितं॥३५॥ वेदाहियज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वाविहिताश्चयज्ञाः॥ तस्मादिदंकालविधानशास्त्रंयोज्यो
तिषंवेदसवेदयज्ञान्यो ज्योतिषंवेदसवेद यज्ञानिति॥३६॥७॥ पंच
संवत्सरंप्रपद्यतेकार्याः कलादशचयाः पर्वसविनाविषुवंसत॥ इति
ज्योतिषंसमाप्तं॥ ॥श्रीकृष्णार्पणमस्तु॥ गणपतरावगोविंदजोशीन ३
॥लिखितं॥

६

॥ज्योतिषसमाप्तः॥